# आचार्य द्वितीय वर्ष, साहित्य (प्रथम पत्र), विषय वक्रोक्ति जीवित

डॉ. पवन कुमार

# लघ्वतिलघूत्तरीयाणि प्रश्नोत्तराणि

(१) **प्रश्न– वक्रोक्तिजीवितं काव्यं केन विरचितम् ?**
उत्तर– वक्रोक्तिजीवितंनामकं काव्यं श्रीमद्राजानककुन्तकमहाभागेन विरचितमस्ति।

(२) **प्रश्न– श्रीमद्राजानककुन्तकस्य वक्रोक्तिजीवितंनाम काव्यमलङ्कार-गुणध्वनि-सम्प्रदायेषु कस्मिन् सम्प्रदाये समायाति ?**
उत्तर– वक्रोक्तिजीवितंनाम काव्यं कस्मिन्नपि सम्प्रदायेऽन्तर्भूतो नैव भवति; अपितु वक्रोक्तिसम्प्रदाय: स्वतन्त्र: सम्प्रदाय: अस्ति।

(३) **प्रश्न– कदा समुत्पन्नोऽयं कविराजानको विद्वद्वरेण्य: कुन्तक: ?**
उत्तर– अयं कुन्तकाचार्यवर्य: दशमशतकस्यान्त्यभागे एकादशशतकस्यादिमे भागे प्रादुर्भूत इति समालोचका: विद्वांस: समुद्गिरन्ति।

(४) **प्रश्न– कस्य विदुष: समकालिकोऽयं कविराजानक: कुन्तक: ?**
उत्तर– आचार्याभिनवगुप्तपादमहाभागस्य समकालिकोऽयमिति उभावेवाचार्यौ समसामयिकाविति स्वीकृतम्भवति आचार्यै:।

(५) **प्रश्न– आचार्यकुन्तकस्य सिद्धान्तस्य केन खण्डनं कृतम् ?**
उत्तर– आचार्यकुन्तकस्य सिद्धान्तस्य खण्डनम् एकादशशतकस्य अन्तिमे समये समुत्पन्नेन महिमभट्टाचार्यमहाभागेन कृतमस्ति।

(६) **प्रश्न– कुन्तक: राजशेखरात् पूर्ववर्ती परवर्ती वेति सप्रमाणं ब्रूत ?**
उत्तर– वक्रोक्तिजीविते आचार्यराजशेखरस्य ग्रन्थानामुद्धरणं वारं वारं सुप्रयुक्तत्वात् सिध्यति यत् अशंसयमेव कुन्तको राजशेखरात्परवर्तीति।

(७) **प्रश्न– वक्रोक्तिजीवितकार: कुन्तक इत्यत्र किं प्रमाणम् ?**
उत्तर– अलङ्कारशास्त्रस्येतिहासे 'कुन्तक:' 'कुन्तलो' वा वक्रोक्तिजीवितकार इति संज्ञयैव सुप्रसिद्धतया कुन्तक एव वक्रोक्तिजीवितस्य कर्तेति प्रमाणम्।

(८) **प्रश्न– आचार्यकुन्तकस्य वक्रोक्तिजीविते को सिद्धान्तो निर्धारित: ?**
उत्तर– वक्रोक्तिजीविते कुन्तकमहाभागस्य विशिष्टसिद्धान्तोऽयमेवासीत्, यत् वक्रोक्तिरेव काव्यस्य जीवनाधायकं तत्त्वमस्ति।

(९) **प्रश्न– आचार्यकुन्तकविरचिता: के के ग्रन्था ?**
उत्तर– आचार्यकुन्तकस्य एकला रचना वक्रोक्तिजीवितमेवाऽस्ति।

(१०) **प्रश्न– आचार्यकुन्तकस्य वक्रोक्तिजीवितन्नामके काव्ये कति अध्याया: भागा: वा सन्ति ?**
उत्तर– वक्रोक्तिजीवितन्नामके आचार्यकुन्तकविरचिते ग्रन्थे चत्वारो अध्याया: उन्मेषा:

वा सन्ति, येषु प्राथमिकोन्मेषद्वयं समुपलब्धमस्ति, अपरञ्चान्तिमोन्मेषद्वयमपूर्णमेव प्राप्तमस्ति।

**(११) प्रश्न– ग्रन्थोऽयं कतिषु भागेषु विभक्तोऽस्ति ?**

**उत्तर–** अयं वक्रोक्तिजीवितन्नामको ग्रन्थः त्रिषु भागेषु विभाजितो वर्तते।

**(१२) प्रश्न– ग्रन्थोऽयं त्रिषु भागेषु विभक्तश्चेत् के च ते त्रयो भागाः ?**

**उत्तर–** ग्रन्थेऽस्मिन् कारिका-वृत्ति-उदाहरणञ्चेति त्रयो भागाः सन्ति।

**(१३) प्रश्न– किमत्र ग्रन्थे त्रयोऽपि भागाः कुन्तकाचार्यविरचिता वा ग्रन्थान्तरेभ्यः गृहीता ?**

**उत्तर–** अस्मिन् वक्रोक्तिजीवितग्रन्थे त्रिषु भागेषु कारिकाभाग-वृत्तिभागश्चेति भागद्वयं कुन्तकाचार्यस्य स्वीया रचना, उदाहरणानि तु संस्कृतसाहित्यस्य प्रसिद्धग्रन्थेभ्यः गृहीतानि सन्ति।

**(१४) प्रश्न– तत्र प्रथमोन्मेषे के के विषयाः प्रतिपादिताः सन्ति ?**

**उत्तर–** वक्रोक्तिजीवितस्य प्रथमोन्मेषे तावत् काव्यस्य प्रयोजनम्, साहित्यस्य कल्पना, वक्रोक्तेः लक्षणञ्च चारुतया वर्णितमस्ति।

**(१५) प्रश्न– अत्र ग्रन्थे आचार्यकुन्तकः वक्रोक्तेः कति भेदान् स्वीकरोति ?**

**उत्तर–** कुन्तकः स्वविरचिते वक्रोक्तिजीवितन्नामके ग्रन्थे वक्रोक्तेः षड् भेदान् स्वीकरोति।

**(१६) प्रश्न– षण्णां वक्रोक्तेः भेदानां निर्देशः कुत्र वर्तते ?**

**उत्तर–** एषां समेषामपि भेदानां निर्देशः तत्र प्रथमोन्मेषे सामान्यतया कृतो वर्तते।

**(१७) प्रश्न– के च ते वक्रोक्तेः षड् भेदाः ?**

**उत्तर–** वक्रोक्तेः भेदाः; यथा— १. वर्णवक्रता, २. पदपूर्वार्द्धवक्रता, ३. प्रत्ययवक्रता, ४. वाक्यवक्रता, ५. प्रकरणवक्रता, ६. बन्धनवक्रता चेति षड्विधा।

**(१८) प्रश्न– वक्रोक्तिरित्यस्य कोऽर्थः, यो हि काव्यजीवितमस्ति ?**

**उत्तर–** वैदग्ध्यभङ्गीभणिति अर्थात् सर्वसाधारणैः प्रयुक्तेभ्यः वाक्येभ्यः कथनस्य विलक्षणता।

**(१९) प्रश्न– वक्रोक्तेः मूलभूता कल्पना कस्य ?**

**उत्तर–** वक्रोक्तेः मूलभूता कल्पना आचार्यभामहस्यास्ति।

**(२०) प्रश्न– वक्रोक्तेः व्यापके साहित्यिके तत्त्वे श्रेयः कङ्गच्छति ?**

**उत्तर–** वक्रोक्तेः व्यापके साहित्यिके तत्त्वे श्रेयः कुन्तकं प्रति गच्छति।

**(२१) प्रश्न– वक्रोक्तेः षण्णां भेदानां सामान्यतया वर्णनं प्रथमोन्मेषे चेत् विस्तृवर्णनं कुत्र ?**

**उत्तर–** वर्णविन्यासवक्रता-पदपूर्वार्द्धवक्रता-प्रत्ययवक्रतायाश्च वर्णनं विस्तृतरूपेण द्वितीयोन्मेषे विद्यते; तथा च वाक्यवक्रतायाः विस्तृतं विर्णनं तृतीयोन्मेषे विद्यते।

**(२२) प्रश्न– एवञ्च चतुर्थोन्मेषे विस्तृतं वर्णनं किमस्ति ?**

**उत्तर–** चतुर्थोन्मेषे प्रकरणवक्रतायाः प्रबन्धवक्रतायाश्च विशदं वर्णनं विद्यते।

**(२३) प्रश्न– आचार्यकुन्तकस्य प्रसिद्धेः कारणं किम् ?**

**उत्तर–** आचार्यकुन्तकस्य वैशिष्ट्यं वक्रोक्तेः सुचिन्तितायाः कल्पनायाः कारणेन अस्ति।

**(२४) प्रश्न– साहित्यशास्त्रे रससम्प्रदायः केन प्रवर्तितः ?**

**उत्तर–** साहित्यशास्त्रे मुनिना भरतेन रससम्प्रदायः प्रवर्तितः।

**(२५) प्रश्न– अलङ्कारसम्प्रदायः कैः परिवर्धितः ?**

**उत्तर–** अलङ्कारसम्प्रदायस्य परिवर्धनं भामह-उद्भट-रुद्रटादिभिः कृतम्।

**(२६) प्रश्न– वक्रोक्तिशब्दस्य वाच्यार्थः कोऽस्ति ?**

**उत्तर–** वक्रा उक्तिः अर्थात् सर्वसाधारणजनानां कथनाद् भिन्नमलौकिकचमत्कारैः संयुक्तं समीचीनकथनं वक्रोक्तिशब्दस्य वाच्यार्थोऽस्ति।

**(२७) प्रश्न– आचार्यकुन्तकमतेन वक्रोक्तेरर्थो लेख्यः ?**

**उत्तर–** आचार्यकुन्तकानुसारं वक्रोक्तिरित्यस्यार्थः 'वैदग्ध्यभङ्गीभणितिः' वर्तते।

**(२८) प्रश्न– वक्रोक्तिजीविते ग्रन्थे मूले कारिकायां वृत्तौ च वक्रोक्तिशब्दस्य कोऽर्थः निर्णीतोऽस्ति ?**

**उत्तर–** वक्रोक्तिजीविते मूले वृत्तौ च वक्रोक्तिशब्दस्यार्थो निर्णीतः; यथा— 'वक्रोक्तिरेव वैदग्ध्यभङ्गी भणितिरुच्यते' इति (१/१०); तथा च वृत्तौ— 'वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा। वैदग्ध्यं कविकौशलं तस्य भङ्गी विच्छित्तिः' इति।

**(२९) प्रश्न– आचार्यभामहः वक्रोक्तिविषये किमाह ?**

**उत्तर–** आचार्यो भामहः अतिशयोक्त्यलङ्कारमेव वक्रोक्तिनाम्ना सम्बोधयति, अलङ्कारस्य जीवनाधायकत्वञ्च स्वीकरोति यथा—

सैषां सर्व वक्रोक्तिरन्यार्थो विभाव्यते।

**(३०) प्रश्न– लोचनकारेण वक्रोक्तिविषये किं भणितम् ?**

**उत्तर–** 'शब्दस्य वक्रता अभिधेयस्य च वक्रता लोकोत्तीर्णेन रूपेणावस्थानमि'ति।

**(३१) प्रश्न– काव्यादर्शकारो दण्डी वक्रोक्तिविषये किमुद्घोषयति ?**

**उत्तर–** वक्रोक्ति-स्वभावोक्तिस्वरूपाभ्यां वाङ्मयं द्विविधं प्रोक्तम्, वक्रोक्तौ श्लेषेण सौन्दर्योत्पत्तिः स्वीकृता; तथाहि—

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
भिन्नं द्विधा समासोक्तिः वक्रोक्तिश्चेति वाङ्मयम्॥ इति।

**(३२) प्रश्न– आचार्यकुन्कस्य विश्लेषणा शक्तिः कीदृशी विद्यते ?**

**उत्तर–** आचार्यकुन्तकस्य विश्लेषणा-विवेचनाशक्तिश्च श्लाघनीयाऽस्ति।

**(३३) प्रश्न– वक्रोक्तिजीवितम् नामकः आचार्यकुन्तकस्य ग्रन्थः कीदृशोऽस्ति ?**

**उत्तर–** राजानक आचार्यकुन्तकमहाभागानामयं वक्रोक्तिजीवितम् नामको ग्रन्थः अलङ्कार-शास्त्रस्य मौलिकविचाराणां आयतनभाण्डागारः वर्तते।

**(३४) प्रश्न– रुद्रटाचार्यानुयायिनः आचार्याः वक्रोक्तिविषये किं मन्यन्ते ?**

**उत्तर–** केचन रुद्रटानुयायिनः आचार्याः वक्रोक्तिं सामान्यशब्दालङ्कारमात्रमेव स्वीकुर्वन्ति।

**(३५) प्रश्न– वक्रोक्तेः बीजरूपेणोपस्थापनस्य श्रेयः कमस्ति ?**

**उत्तर–** वक्रोक्तेः महनीयां भावनां बीजरूपेणोपस्थापनस्य श्रेयः आचार्यं भामहमस्ति।

**(३६) प्रश्न– आचार्यभामहद्वारा समुपस्थापितबीजस्य अङ्कुरणपल्लवनस्य च श्रेयः कमस्ति ?**

**उत्तर–** भामहाचार्यारोपितबीजस्योदात्तरूपेणाङ्कुरणस्य पल्लवनस्य च श्रेयः कुन्तकस्येवास्ति।

**(३७) प्रश्न– आचार्यकुन्तकस्य कल्पनायां ध्वन्यालोकादिग्रन्थानां किं स्थानं निर्धारितमस्ति ?**

**उत्तर–** आचार्यकुन्तकमहाभागेन स्वकीये वक्रोक्तिजीवितनामके ग्रन्थे ध्वन्यालोकस्थितानामपि पद्यानां उदाहरणरूपेण संग्रहः कृतः, परञ्च वक्रोक्तेः कल्पना इयती उदात्ता, व्यापिका, बहुमुखी चास्ति यत्तदाभ्यन्तरे ध्वनेः सर्वमपि प्रपञ्चं प्रपञ्चितमस्ति। अत एव 'वक्रोक्ति काव्यजीवितमि'ति। सार्थकत्वमावहति।

**(३८) प्रश्न– कुन्तकाचार्यानुसारं समेषामलङ्काराणां समावेशः कुत्र भवति ?**

**उत्तर–** उपमादयोऽलङ्काराः सर्वेऽपि राजानक आचार्यकुन्तकमतेन वाक्यवक्रतायां समाविष्टाः भवन्ति; तथाहि—

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥ इति।

**(३९) प्रश्न– अत्र ग्रन्थे किन्नामाभिधेयम् ?**

**उत्तर–** उपमादिप्रमेयजातमभिधेयम्।

**(४०) प्रश्न– अत्र ग्रन्थे आचार्यकुन्तकाभिमतमभिधानञ्च किम् ?**

**उत्तर–** अस्य ग्रन्थस्य 'अलङ्कार' इत्यभिधानम्।

**(४१) प्रश्न– वक्रोक्तिजीवितम् इति ग्रन्थस्य प्रयोजनञ्च किमस्ति ?**

**उत्तर–** यद्यपि सन्ति शतशः काव्यालङ्कारास्तथापि न कुतश्चिदपि एवंविधवैचित्र्यसिद्धिः; अतः वैचित्र्यसिद्धिरेवास्य ग्रन्थस्य प्रयोजनमिति।

**(४२) प्रश्न– आचार्यकुन्तकः प्रयोजनकथनावसरे किं विचारयति ?**

**उत्तर–** आचार्यराजानककुन्तकः अलङ्कारस्य अलङ्कार्यस्य च भिन्नं प्रयोजनं प्रस्तौति नैजे वक्रोक्तिजीवितम् नामके ग्रन्थे। तत्रालङ्कारप्रयोजनं एकचत्वारिंशत्तमे प्रश्नोत्तरे निर्दिष्टमस्ति।

**(४३) प्रश्न– कुन्तकाचार्याभिमतानि काव्यस्य (अलङ्कार्यस्य) वा प्रयोजनानि निर्दिश्यताम् ?**

**उत्तर–** धर्मादिः साधनोपायः सुकुमारक्रमोदितः।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः॥ इति।

**(४४) प्रश्न– कुन्तकाभिमतं काव्यस्य द्वितीयं प्रयोजनं प्रदर्शयत ?**

उत्तर– व्यवहार-परिस्पन्द-सौन्दर्य-व्यवहारिभिः ।
सत्काव्याभिगमादेव नूतनौचित्यमाप्यते ॥ इति ।

(४५) प्रश्न– **वक्रोक्तिजीविते निर्दिष्टं तृतीयं काव्यप्रयोजनं प्रतिपादयत ?**
उत्तर– चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ॥

(४६) प्रश्न– **कुन्तकाचार्यकृतं काव्यलक्षणं प्रदर्शयत ?**
उत्तर– अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते ।
तदुपायतया तत्त्वं सालङ्कारस्य काव्यता ॥

(४७) प्रश्न– **वक्रोक्तिजीविते प्रतिपादितमपरं काव्यलक्षणं लिखत ?**
उत्तर– शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ॥ इति ।

(४८) प्रश्न– **कुन्तकाचार्याभिमतं साहित्यलक्षणं प्रतिपाद्यताम् ?**
उत्तर– साहित्यमनयोः शोभाशालितां प्रति काऽप्यसौ ।
अन्यूनानतिरिक्तत्व-मनोहारिण्यवस्थितिः ॥ इति ।

(४९) प्रश्न– **सत्सु वेदादिशास्त्रेषु किमिति काव्यस्यावश्यकत्वमिति साध्यताम् ?**
उत्तर– कटुकौषधवच्छास्त्रमविद्याव्याधिनाशकम् ।
आह्लाद्यमृतवत् काव्यमविवेक-गदापहम् ॥ इति ।

(५०) प्रश्न– **शब्दार्थयोः स्वरूपं प्रतिपादयत ?**
उत्तर– वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयन्तु नः ॥ इति ।

(५१) प्रश्न– **वक्रोक्तेरेवालङ्कारत्वं साध्यताम् ?**
उत्तर– उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः ।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते ॥ इति ।

(५२) प्रश्न– **स्वभावोक्तिरलङ्कारत्वं खण्डयत ?**
उत्तर– शरीरं चेदलङ्कारः किमलङ्कुरुतेऽपरम् ।
आत्मैव नात्मनस्कन्धं क्वचिदप्यधिरोहति ॥ इति ।

(५३) प्रश्न– **काव्यलक्षणे निर्दिष्टस्य 'सहितौ' शब्दस्यार्थं स्पष्टीकुरुत ?**
उत्तर– शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा ।
सहिताविति तावेव किमपूर्वं विधीयते ॥ इति ।
तदेवं निसर्गसिद्धं साहित्यमिति ।

(५४) प्रश्न– **वर्णविन्यासवक्रत्वं प्रतिपादयत ?**
उत्तर– वर्णानां विन्यासो वर्णविन्यासः अर्थात् अक्षराणां विशिष्टन्यसनं, तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येणोपनिबद्धः ।

**(५५) प्रश्न– वर्णविन्यासवक्रतायाः उदाहरणं प्रतिपादयत ?**

उत्तर– वर्णविन्यासवक्रताया उदाहरणं प्रस्तूयते, यथा—

प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।
प्रसरति ततो ध्वान्तक्षोदक्षमक्षणदा मुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥ इति।

**(५६) प्रश्न– वर्णविन्यासवक्रतायां कोऽलङ्कारो विलीयत इति स्पष्टयत ?**

उत्तर– वर्णविन्यासवक्रतायामनुप्रास अलङ्कारो विलीयते।

**(५७) प्रश्न– कविव्यापारवक्रताया द्वितीया वक्रता प्रतिपादनीया ?**

उत्तर– कविव्यापारवक्रतायाः द्वितीया वक्रता पदपूर्वार्द्धवक्रताऽस्ति।

**(५८) प्रश्न– पदपूर्वार्द्धवक्रतायाः भेदाः प्रदर्शनीयाः ?**

उत्तर– सुबन्तस्य तिङन्तस्य वा पदस्य यः पूर्वार्द्धः अर्थात् प्रातिपदिकलक्षणं धातुलक्षणं वा विद्यते, तस्य वक्रता रचनावैचित्र्यं भवति, तत्राप्यनेके भेदाः भवन्ति— प्रत्ययाश्रितवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता इत्यादयो भेदाः भवन्ति।

**(५९) प्रश्न– क्रियावैचित्र्यवक्रताया उदाहरणं देयम् ?**

उत्तर– स्वेच्छाकेशरिणः स्वच्छस्वच्छाया यासितेन्दवः।
गायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः ॥
इति क्रियावैचित्र्यवक्रतायाः उदाहरणम्।

**(६०) प्रश्न– कविप्रस्थानहेतवस्त्रयो मार्गाः के ?**

उत्तर– कवेः काव्यकारणभूतास्त्रयो मार्गाः; ते च सुकुमारः, मध्यमः, विचित्रश्चेति; तथाहि—

सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः ॥ इति।

**(६१) प्रश्न– रीतयः कतिधा, वक्रोक्तिजीवितानुसारं ब्रूत ?**

उत्तर– अत्र प्राचीनाः वामनराजशेखरादयः वैदर्भी, गौडी, पाञ्चाली इति त्रिधा स्वीकुर्वन्ति।

**(६२) प्रश्न– दण्डीमते कति रीतयो भवन्ति ?**

उत्तर– दण्डीमते द्विधैव रीति।

**(६३) प्रश्न– सुकुमारमार्गः कः ?**

उत्तर– सुकुमाराभिधः सोऽयं येन सत्कवयो गताः।
मार्गेणोत्फुल्लकुसुमकाननेनेव षट्पदाः ॥ इति।

**(६४) प्रश्न– सुकुमारताया उदाहरणं देयम् ?**

उत्तर– यद्यपि सुकुमारतायाः उदाहरणानि बहूनि सन्ति, तथापि एकमेवोदाहरणमत्र प्रस्तूयते; तथाहि—

बालेन्दुवक्राण्यविकाशभावाद् बभुः पलान्यातिविलोहितानि।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥ इति।

(६५) **प्रश्न– विचित्रमार्गं प्रदर्शयत ?**

**उत्तर–** यत्र कवयः अनेकालङ्काराणां हारादौ मणिबन्धस्येव निबन्धनं कुर्वन्ति तत्र विचित्रमार्गो भवति; यथा—
अलङ्कारस्य कवयो यत्रालङ्करणान्तरम्।
असन्तुष्टाः निबध्नन्ति हारोदर्मणिबन्धवत्॥ इति।

(६६) **प्रश्न– मध्यममार्गविषये तस्य स्वरूपं प्रदर्शयत ?**

**उत्तर–** यत्र माधुर्यादिगुणानां समूहः शोभातिशयं पुष्णाति, स एव मध्यममार्गः; तथाहि—
माधुर्यादिगुणग्रामो वृत्तिमासृत्य बन्धनम्।
यत्र कामपि पुष्णाति बन्धच्छायातिरिक्तताम्॥ इति।

(६७) **प्रश्न– विचित्रमार्गस्य लक्षणं प्रतिपादयत ?**

**उत्तर–** यत्र कवेः काव्यशक्तिः प्रथममेवोल्लेखावसरे शब्दार्थयोः वक्रत्वं स्फुरतीव प्रतिभाति तत्र विचित्रमार्गो भवति; यथा—
प्रतिभा प्रथमोद्भेदसमये यत्र वक्रता।
शब्दाभिधेययोरन्तःस्फुरतीव विभाव्यते॥ इति।

(६८) **प्रश्न– सुकुमारमार्गस्य के गुणाः ?**

**उत्तर–** समास-प्राचुर्यरहितः चमत्कारिपदविन्याससमन्वितः माधुर्यगुणः सुकुमारमार्गस्य प्रथमो गुणः; यथा—
असमस्तमनोहारि पदविन्यासजीवितम्।
माधुर्यं सुकुमारस्य मार्गस्य प्रथमो गुणः॥ इति।

(६९) **प्रश्न– सुकुमारगुणेषु माधुर्यगुणस्योदाहरणं लिखत ?**

**उत्तर–** यथा— क्रीडारसेन रहसि स्मितपूर्वमिन्दो-
लेखा विकृष्य विनिबध्य च मूर्ध्नि गौर्या।
किं शोभिताहमनयेति शशाङ्कमौलेः
पृष्टस्य पातु परिचुम्बनमुत्तरं वः॥ इति।

(७०) **प्रश्न– सुकुमारमार्गमध्ये प्रसादगुणस्य लक्षणं ब्रूत ?**

**उत्तर–** अक्लेशव्यञ्जिताकूतं झगित्यर्थसमर्पणम्।
रसवक्रोक्तिविषयं यत्प्रसादः स उच्यते॥ इति।

(७१) **प्रश्न– सुकुमारमार्गान्तर्गतप्रसादगुणस्योदाहरणं लिखत ?**

**उत्तर–** हिमव्यपायाद्विशदा धराणामापाण्डुरीभूतमुखच्छवीनाम्।
स्वेदोद्गमः किम्पुरुषाङ्गनानां चक्रे पदं यत्र विशेषकेषु॥ इति।

(७२) **प्रश्न– सुकुमारमार्गान्तर्गतलावण्यगुणस्य लक्षणं प्रदर्श्यताम् ?**

उत्तर– वर्णविन्यासविच्छित्ति-पदसन्धान-सम्पदा ।
स्वल्पया बन्धसौन्दर्यं लावण्यमभिधीयते ॥ इति ।

**(७३) प्रश्न– सुकुमारमार्गे आभिजात्यगुणलक्षणं प्रतिपादयत ?**

उत्तर– श्रुतिपेशलताशालि सुस्पर्शमिव चेतसा ।
स्वभावमसृणच्छायामाभिजात्यं प्रचक्षते ॥ इति ।

**(७४) प्रश्न– आभिजात्यगुणस्योदाहरणं प्रदर्शयत ?**

उत्तर– ज्योतिर्लेखा वलयिगलितं यस्य बर्हं भवानी ।
पुत्रप्रीत्या कुवलयदलप्रापि कर्णे करोति ॥ इति ।

**(७५) प्रश्न– औचित्यं नामकस्य सामान्यगुणस्य लक्षणं लिखत ?**

उत्तर– आभासेन स्वभावस्य महत्त्वं येन पोष्यते ।
प्रकारेण तदौचित्यमुचिताख्यानजीवितम् ॥ इति ।

**(७६) प्रश्न– औचित्यस्योदाहरणं ब्रूत ?**

उत्तर– शरीरमात्रेण नरेन्द्रतिष्ठन् आभासितीर्थप्रतिपादितर्द्धि ।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः ॥ इति ।

**(७७) प्रश्न– सौभाग्यगुणलक्षणं प्रतिपादयत ?**

उत्तर– इत्युदेयवर्गेऽस्मिन् यदर्थं प्रतिभां कवेः ।
सम्यक् संरमते तस्य गुणः सौभाग्यमुच्यते ॥ इति ।

**(७८) प्रश्न– विचित्रमार्गस्योदाहरणं प्रदर्शयत ?**

उत्तर– कतमः प्रविजृम्भितविरहव्यथः शून्यतां नीतो देशः । इति ।

**(७९) प्रश्न– श्यामायाः किं लक्षणम् ?**

उत्तर– शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला ।
सर्वावयवशोभाढ्या सा श्यामा परिकीर्तिता ॥ इति ।

**(८०) प्रश्न– अन्यालङ्कारिकेभ्यः कृतमाचार्यकुन्तकग्रन्थस्य वैशिष्ट्यं प्रतिपादयत ?**

उत्तर– अन्ये आलङ्कारिकाः केवलं काव्यप्रयोजनं प्रदर्श्य अलङ्कारालङ्कार्ययोः तदेव प्रयोजनं स्वीकुर्वन्ति; यथा—

आचार्यविश्वनाथः स्वसाहित्यदर्पणे स्पष्टतया समुद्घोषयति अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वमिति काव्यफलान्याह इति; परं आचार्यकुन्तकः अलङ्कारस्य अलङ्कार्यस्य च पृथक्-पृथक् प्रयोजनं स्थापयति तेन नवीनमेव प्रदर्शितम् ।

**(८१) प्रश्न– काव्ये कीदृशः शब्दो भवति ?**

उत्तर– शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः ॥ इति ।

**(८२) प्रश्न– शब्दार्थयोः वाच्यवाचकसम्बन्धादतिरिक्तं कीदृशं साहित्यमाचार्यकुन्तकः स्वीकरोति ?**

**उत्तर–** आचार्यकुन्तकः शब्दार्थयोः वाच्यवाचकसम्बन्धरूपं साहित्यं नैव स्वीकरोति; यतो हि काव्यादतिरिक्तमपि तादृशं साहित्यं सुलभं भवति। अतः विशिष्टमेवेह साहित्यम्; तथाहि—

समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ।
परस्परस्य शोभायै शब्दार्थौ भवतो यथा ॥ इति।

**(८३) प्रश्न– स्वभावोक्तिः अलङ्कारः अलङ्कार्यो वेति निर्णीयताम् ?**

**उत्तर–** अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः।
अलङ्कार्यतया तेषां किमन्यदवतिष्ठते ॥
स्वभावव्यतिरेकेण वक्तुमेव न युज्यते।
वस्तु तद्रहितं यस्मान्निरूपाख्यं प्रसज्यते ॥ इति।

अतः स्वभावोक्तिरलङ्कारत्वेन नैव स्वीकरोति आचार्यकुन्तकः; अपितु अलङ्कार्यत्वेनैव स्वीकरोति।

**(८४) प्रश्न– प्रतीयमानलावण्ययोः भेदं प्रदर्शयत ?**

**उत्तर–** अत्र विषये ध्वनिकारः—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तमाभाति लावण्यमिवाङ्गनासु ॥

इति एकमेव रूपकं मनुते; परमाचार्यकुन्तकस्तु लावण्यमेव सर्वाधिकातिशयत्वेन स्वीकरोति; तथाहि—

सोऽतिदुःसञ्चरो येन विदग्धकवयो: गताः।
खड्गधारापथेनैव सुभटानां मनोरथाः ॥

तथा च—

स्वभावसरसाकूतो भावानां यत्र बध्यते।
परिस्फुरति यस्यान्तः सा काऽप्यतिशयाभिधा ॥ इति।

# कक्षा–आचार्यद्वितीयवर्षस्य
# प्रथमपत्रस्य
# वक्रोजीवितम्

प्रेषिका
डॉ. पवन कुमार
साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्
लखनऊपरिसरः, लखनऊ

# वस्तुनिष्ठप्रश्नाः

(१) प्रश्न– वक्रोक्तिजीवितस्य रचनाकारः कः ?

(क) क्षेमेन्द्रः
(ख) कुन्तकः
(ग) विश्वनाथः
(घ) वामनः

(२) प्रश्न– आचार्यकुन्तकः कस्य सम्प्रदायस्य प्रवर्त्तकः ?

(क) वक्रोक्तेः
(ख) ध्वनेः
(ग) रीतेः
(घ) रसस्य

(३) प्रश्न– 'वक्रोक्तिजीवितम्' कस्मिन् विभक्तेऽस्ति ?

(क) अधिकरणे
(ख) उद्योते
(ग) उन्मेषे
(घ) परिच्छेदे

(४) प्रश्न– वक्रोक्तिजीविते कति उन्मेषाः ?

(क) द्वौ
(ख) चत्वारः
(ग) त्रयः
(घ) पञ्च

(५) प्रश्न– कदा समुत्पन्नोऽयं कुन्तकः ?

(क) दशमशताब्द्याम्
(ख) एकादशशताब्द्याम्
(ग) नवमशताब्द्याम्
(घ) द्वादशशताब्द्याम्

(६) प्रश्न– कस्य विदुषः समकालिकोऽयं कुन्तकः ?

(क) क्षेमेन्द्रस्य
(ख) विश्वनाथस्य
(ग) वामनस्य
(घ) अभिनवगुप्तस्य

(७) प्रश्न– कुन्तकस्य सिद्धान्तस्य केन खण्डनं कृतम् ?

(क) अभिनवगुप्तेन
(ख) क्षेमेन्द्रेण
(ग) महिमभट्टेन
(घ) विश्वनाथेन

(८) प्रश्न– वक्रोक्तिजीविते कः उन्मेषः अपूर्णः ?

(क) प्रथमः
(ख) चतुर्थः
(ग) द्वितीयः
(घ) तृतीयः

(९) प्रश्न– आचार्यकुन्तकः वक्रतायाः कति भेदं स्वीकरोति ?

(क) पञ्च
(ख) सप्त
(ग) अष्टौ
(घ) षट्

(१०) प्रश्न– ग्रन्थारम्भे कस्य वन्दनां कृतं कुन्तकेन ?

(क) शिवस्य
(ख) शारदायाः
(ग) विष्णोः
(घ) ब्रह्मणः

(११) प्रश्न– पदपूर्वार्द्धवक्रतायाः कति भेदाः ?

(क) पञ्च
(ख) षट्
(ग) नव
(घ) सप्त

(१२) प्रश्न– प्रत्ययाश्रितवक्रतायाः कति भेदाः ?

(क) पञ्च
(ख) षट्
(ग) अष्टौ
(घ) नव

(१३) प्रश्न– आचार्यकुन्तकेन कति अलङ्कारः स्वीकृतः ?

(क) पञ्चदशः
(ख) अष्टादशः
(ग) षोडशः
(घ) विंशतिः

(१४) प्रश्न– शिववन्दनापश्चात् कस्याः वन्दनां कृतम् ?

(क) शक्तेः
(ख) सरस्वत्याः
(ग) लक्ष्म्याः
(घ) पार्वत्याः

(१५) प्रश्न– आचार्यकुन्तकः वक्रोक्तिजीवितं केन रूपेण विभक्तः ?

(क) कारिकारूपेण
(ख) उदाहरणरूपेण
(ग) वृतिरूपेण
(घ) सम्मिलितरूपेण

(१६) प्रश्न– आचार्यकुन्तकः कस्मिन् देशे समुत्पन्नोऽभवत् ?

(क) विदर्भदेशे
(ख) बङ्गदेशे
(ग) काश्मीरदेशे
(घ) पाञ्चालदेशे

(१७) प्रश्न– काव्यस्य किं प्रयोजनं कथयति वक्रोक्तिजीवितकारः ?

(क) धर्मः
(ख) अर्थः
(ग) चतुर्वर्गः
(घ) कामः

(१८) प्रश्न– प्रथमोन्मेषे कति कारिकाः सन्ति ?

(क) अष्टपञ्चाशत्
(ख) षट्पञ्चाशत्
(ग) पञ्चाशत्
(घ) द्वापञ्चाशत्

(१९) प्रश्न– आचार्यकुन्तक कृतं किं काव्यलक्षणम् ?

(क) शब्दार्थौ सहितौ काव्यम्
(ख) काव्यस्यात्मा ध्वनिः
(ग) वाक्यं रसात्मकं काव्यम्
(घ) दोषरहितौ काव्यम्

(२०) प्रश्न– विदुषां किं हेतुं मन्यते ?

(क) शब्दः
(ख) वाच्यः
(ग) अर्थः
(घ) गुणः

(२१) प्रश्न– रमणीयताविशिष्टशब्दं किं मन्यते ?

(क) काव्यत्वम्
(ख) गुणत्वम्
(ग) अलङ्कारत्वम्
(घ) साधारणत्वम्

(२२) प्रश्न– कौ सम्मिलितौ काव्यमिति भवति ?
(क) धर्मार्थौ (ग) शब्दार्थौ
(ख) वाच्यार्थौ (घ) ध्वन्यर्थौ

(२३) प्रश्न– सर्वगुणसङ्गतौ शब्दार्थौ कमिव भवतः ?
(क) धर्माविव (ग) कर्माविव
(ख) अर्थाविव (घ) सुहृदाविव

(२४) प्रश्न– कं सहृदयहृदयमाह्लादयति ?
(क) वाच्यवैचित्र्यम् (ग) अर्थवैचित्र्यम्
(ख) अलङ्कारवैचित्र्यम् (घ) शब्दवैचित्र्यम्

(२५) प्रश्न– आचार्यकुन्तकस्य वक्रोक्तिजीविते को सिद्धान्तो निर्धारितः ?
(क) वक्रोक्तिरेव काव्यस्यात्मा (ग) शब्दवैशिष्ट्यम्
(ख) अलङ्कारवैशिष्ट्यम् (घ) वाच्यवैशिष्ट्यम्

(२६) प्रश्न– आचार्यकुन्तकस्य कति ग्रन्थाः ?
(क) एकः (ग) द्वौ
(ख) त्रयः (घ) चत्वारः

(२७) प्रश्न– ग्रन्थोऽयं कतिषु विभागेषु विभक्तोऽस्ति ?
(क) द्वौ (ग) चत्वारः
(ख) त्रयः (घ) पञ्च

(२८) प्रश्न– षण्णां वक्रोक्तेः भेदानां निर्देश कुत्र वर्तते ?
(क) द्वितीयोन्मेषे (ग) तृतीयोन्मेषे
(ख) प्रथमोन्मेषे (घ) चतुर्थोन्मेषे

(२९) प्रश्न– वक्रोक्तेः मूलभूता कल्पना कस्य ?
(क) अचार्यभामहस्य (ग) आचार्यवामनस्य
(ख) आचार्यक्षेमेन्द्रस्य (घ) आचार्यमम्मटस्य

(३०) प्रश्न– वक्रोक्तेः षण्णां भेदानां विस्तृतवर्णनं कुत्र ?
(क) प्रथमोन्मेषे (ग) तृतीयोन्मेषे
(ख) द्वितीयोन्मेषे (घ) चतुर्थोन्मेषे

(३१) प्रश्न– प्रकरणवक्रताया प्रबन्धवक्रतायाश्च विशदं वर्णनं कुत्र विद्यते ?
(क) प्रथमोन्मेषे (ग) द्वितीयोन्मेषे
(ख) तृतीयोन्मेषे (घ) चतुर्थोन्मेषे

(३२) प्रश्न– वैशिष्ट्यं वक्रोक्तेः कल्पनायाः कारणेन कस्यास्ति ?
(क) आचार्यवामनस्य (ग) आचार्यभामहस्य
(ख) आचार्यकुन्तकस्य (घ) आचार्यमम्मटस्य

Scanned with CamScanner

(३३) प्रश्न– साहित्यशास्त्रे रससम्प्रदायः केन प्रवर्तितः ?

(क) विश्वनाथेन (ग) भरतमुनिना

(ख) कुन्तकेन (घ) मम्मटेन

(३४) प्रश्न– रीतिसम्प्रदायस्य कः प्रवर्त्तकः ?

(क) कुन्तकः (ग) मम्मटः

(ख) वामनः (घ) भरतमुनिः

(३५) प्रश्न– औचित्यसम्प्रदायस्य कः प्रवर्त्तकः ?

(क) वामनः (ग) मम्मटः

(ख) कुन्तकः (घ) क्षेमेन्द्रः

(३६) प्रश्न– ध्वनिसम्प्रदायस्य कः प्रवर्त्तकः ?

(क) आनन्दवर्धनः (ग) क्षेमेन्द्रः

(ख) भामहः (घ) कुन्तकः

(३७) प्रश्न– वक्रोक्तेः बीजरूपेणोपस्थापनस्य श्रेयः कस्यास्ति ?

(क) आचार्यभामहस्य (ग) आचार्यक्षेमेन्द्रस्य

(ख) आचार्यकुन्तकस्य (घ) आचार्यदण्डिनः

(३८) प्रश्न– कुन्तकाचार्यानुसारं समेषामलङ्काराणां समावेशः कुत्र भवति ?

(क) शब्दवक्रतायाम् (ग) वाक्यवक्रतायाम्

(ख) अर्थवक्रतायाम् (घ) सर्वत्र

(३९) प्रश्न– अस्मिन् ग्रन्थे आचार्य कुन्तकाभिमतमभिधानञ्च किम् ?

(क) ध्वनिः (ग) रसः

(ख) अलङ्कारः (घ) अर्थाभिधानम्

(४०) प्रश्न– रीतयः कतिधा, वक्रोक्तिजीवितानुसारं ब्रूत ?

(क) पञ्चधा (ग) द्विधा

(ख) चतुर्धा (घ) त्रिधा

(४१) प्रश्न– दण्डिमते कतिधा रीतयो भवन्ति ?

(क) द्विधा (ग) त्रिधा

(ख) पञ्चधा (घ) चतुर्धा

(४२) प्रश्न– वर्णविन्यासवक्रतायां कोऽलङ्कारो विलीयते ?

(क) श्लेषः (ग) अनुप्रासः

(ख) उपमा (घ) यमकः

(४३) प्रश्न– कविप्रस्थानहेतवः कति मार्गाः ?

(क) पञ्च (ग) द्वौ

(ख) त्रयः (घ) चत्वारः

Scanned with CamScanner

**(४४) प्रश्न– वर्णविन्यासवक्रता कस्मिन् उन्मेषे वर्णितं कुन्तकेन ?**

(क) प्रथमोन्मेषे (ग) द्वितीयोन्मेषे
(ख) तृतीयोन्मेषे (घ) चतुर्थोन्मेषे

**(४५) प्रश्न– वाक्यवक्रतायाः विस्तृतं विवेचनं कस्मिन् उन्मेषे प्राप्यते ?**

(क) प्रथमोन्मेषे (ग) चतुर्थोन्मेषे
(ख) द्वितीयोन्मेषे (घ) तृतीयोन्मेषे

**(४६) प्रश्न– पदपूर्वार्धवक्रतायाः वर्णनं कस्मिन् उन्मेषेऽभवत् ?**

(क) द्वितीयोन्मेषे (ग) तृतीयोन्मेषे
(ख) चतुर्थोन्मेषे (घ) प्रथमोन्मेषे

**(४७) प्रश्न– प्रत्ययवक्रतायाः वर्णनं कस्मिन् उन्मेषेऽभवत्?**

(क) प्रथमोन्मेषे (ग) तृतीयोन्मेषे
(ख) द्वितीयोन्मेषे (घ) चतुर्थोन्मेषे

**(४८) प्रश्न– कुत्र अलङ्काराणामन्तर्निवेशः विद्यते ?**

(क) वर्णविन्यासवक्रतायाम् (ग) वाक्यवक्रतायाम्
(ख) प्रकरणवक्रतायाम् (घ) प्रत्ययवक्रतायाम्

**(४९) प्रश्न– 'वक्रोक्तिः अलङ्कारस्य सर्वस्वं जीवनमस्ति' केन भणितम् ?**

(क) आचार्यकुन्तकेन (ग) आचार्यभामहेन
(ख) आचार्यमम्मटेन (घ) आर्चायवामनेन

**(५०) प्रश्न– केन मतेन 'वक्रोक्तिः वैदग्ध्यभङ्गीभणितिरस्ति' ?**

(क) आचार्यकुन्तकः (ग) आचार्यक्षेमेन्द्रः
(ख) आचार्यवामनः (घ) आचार्यभामहः

**(५१) प्रश्न– 'वक्रोक्तिस्वभावोक्तिस्वरूपाभ्यां वाङ्मयं द्विविधम्' केन भणितम् ?**

(क) दण्डिना (ग) वामनेन
(ख) भामहेन (घ) कुन्तकेन

**(५२) प्रश्न– प्रकरणवक्रतायाः विशिष्टं वर्णन कस्मिन् उन्मेषेऽभवत् ?**

(क) द्वितीयोन्मेषे (ग) चतुर्थोन्मेषे
(ख) प्रथमोन्मेषे (घ) तृतीयोन्मेषे

**(५३) प्रश्न– प्रबन्धवक्रतायाः विशिष्टं वर्णनं कस्मिन् उन्मेषेऽभवत् ?**

(क) प्रथमोन्मेषे (ग) द्वितीयोन्मेषे
(ख) चतुर्थोन्मेषे (घ) तृतीयोन्मेषे

**(५४) प्रश्न– काव्यस्य प्रयोजनं वक्रोक्तेः लक्षणम् कस्मिन् उन्मेषे वर्णितमस्ति ?**

(क) द्वितीयोन्मेषे (ग) चतुर्थोन्मेषे
(ख) प्रथमोन्मेषे (घ) तृतीयोन्मेषे

Scanned with CamScanner

**(५५) प्रश्न– 'तयोः पुनरलङ्कृतिः वक्रोक्तिरेव' कस्मिन् ग्रन्थे उद्धृतम् ?**

(क) काव्यप्रकाशे (ग) औचित्यविचारचर्चायाम्

(ख) ध्वन्यालोके (घ) वक्रोक्तिजीविते

**(५६) प्रश्न– अलङ्काराणां विस्तृतवर्णनं कस्मिन् उन्मेषेऽभवत् ?**

(क) प्रथमोन्मेषे (ग) द्वितीयोन्मेषे

(ख) तृतीयोन्मेषे (घ) चतुर्थोन्मेषे

**(५७) प्रश्न– आचार्य कुन्तकः साहित्यदर्शने अर्थं केन रूपेण मन्यते ?**

(क) शक्तिरूपेण (ग) शिवरूपेण

(ख) धर्मरूपेण (घ) अन्यरूपेण

**(५८) प्रश्न– साहित्यदर्शने वाणीं केन रूपेण मन्यते ?**

(क) शक्तिरूपेण (ग) शिवरूपेण

(ख) धर्मरूपेण (घ) कार्यरूपेण

**(५९) प्रश्न– संस्कृतसाहित्ये वाण्याः कति रूपाणि सन्ति ?**

(क) द्वौ (ग) त्रयः

(ख) चत्वारः (घ) पञ्च

**(६०) प्रश्न– काव्यमार्गस्य मुख्यतया कति भेदाः ?**

(क) द्विभेदाः (ग) चतुर्भेदा

(ख) त्रिभेदाः (घ) पञ्चभेदाः

**(६१) प्रश्न– सुकुमारमार्गस्य कति गुणाः सन्ति ?**

(क) द्वौ (ग) पञ्च

(ख) त्रयः (घ) चत्वारः

**(६२) प्रश्न– विचित्रमार्गस्य कति गुणाः सन्ति ?**

(क) चत्वारः (ग) द्वौ

(ख) पञ्च (घ) त्रयः

**(६३) प्रश्न– मध्यममार्गस्य कति गुणाः सन्ति ?**

(क) द्वौ (ग) त्रयः

(ख) पञ्च (घ) चत्वारः

**(६४) प्रश्न– 'साहित्यमनयोः शोभाशालितां प्रति काप्यसौ' इत्यादि कस्य स्वरूपं वर्णयति ?**

(क) रसस्वरूपं (ग) धर्मस्वरूपं

(ख) साहित्यस्वरूपं (घ) वाक्यस्वरूपं

**(६५) प्रश्न– सुकुमारः विचित्रश्च मध्यमश्चेति सम्प्रति किमस्ति ?**

(क) मार्गः (ग) ध्वनिः

(ख) अलङ्कारः (घ) रसः

Scanned with CamScanner

(६६) प्रश्न– वैदर्भीगौडीयरूपं मार्गद्वयं केन कथितम् ?

(क) वामनेन (ग) दण्डिना
(ख) कुन्तकेन (घ) क्षेमेन्द्रेण

(६७) प्रश्न– 'प्रतिमा प्रथमोद्भेदसमये यत्र वक्रता' कस्य लक्षणमस्ति ?

(क) विचित्रमार्गस्य (ग) सुकुमारमार्गस्य
(ख) मध्यममार्गस्य (घ) वैदर्भीमार्गस्य

(६८) प्रश्न– सुकुमारमार्गस्य प्रथमो गुणः कः ?

(क) प्रसादः (ग) कान्तिः
(ख) ओजः (घ) माधुर्यः

(६९) प्रश्न– 'स्वेच्छाकेसरिणः....मधुरिपो प्रपन्नार्तिच्छिदो नखाः' अयं कस्य वक्रतायाः उदाहरणम् ?

(क) वाक्यवैचित्र्यस्य (ग) शब्दवैचित्र्यस्य
(ख) क्रियावैचित्र्यस्य (घ) अर्थवैचित्र्यस्य

(७०) प्रश्न– 'मध्येऽङ्कुरं पल्लवाः' इत्यत्र कीदृशी वक्रता ?

(क) शब्दवैचित्र्यवक्रता (ग) वाक्यवैचित्र्यवक्रता
(ख) वृत्तिवैचित्र्यवक्रता (घ) अर्थवैचित्र्यवक्रता

(७१) प्रश्न– 'पाण्डिम्नि मग्नं वपुः' इत्यत्र कीदृशी वक्रता ?

(क) वाक्यवैचित्र्यवक्रता (ग) वृत्तिवैचित्र्यवक्रता
(ख) अर्थवैचित्र्यवक्रता (घ) शब्दवैचित्र्यवक्रता

(७२) प्रश्न– 'सोऽयं दम्भधृतव्रतः प्रियतमे कर्तुं किमप्युद्यतः' अत्र कीदृशी वक्रता ?

(क) पदपूर्वार्द्धवक्रता (ग) वाक्यवक्रता
(ख) शब्दवक्रता (घ) अर्थवक्रता

(७३) प्रश्न– 'स्वभावव्यतिरेकेण वक्तुमेव न युज्यते' इयं कारिका कस्मिन् उन्मेषेऽस्ति ?

(क) द्वितीयोन्मेषे (ग) तृतीयोन्मेषे
(ख) प्रथमोन्मेषे (घ) चतुर्थोन्मेषे

(७४) प्रश्न– 'भूषणत्वे स्वभावस्य विहिते भूषणान्तरे' इयं कारिकाः केन सम्बद्धः ?

(क) रीत्या (ग) अलङ्कारेण
(ख) काव्येन (घ) अन्येन

(७५) प्रश्न– 'साहित्यमनयोः शोभाशालितां प्रति काप्यसौ' कस्मिन् ग्रन्थेऽस्ति ?

(क) वक्रोक्तिजीविते (ग) साहित्यदर्पणे
(ख) काव्यप्रकाशे (घ) रसगङ्गाधरे

(७६) प्रश्न– काव्यवक्रतायाः कति भेदाः भवन्ति ?

(क) त्रयः (ग) चत्वारः
(ख) पञ्च (घ) षट्

Scanned with CamScanner

(७७) प्रश्न– कविव्यापारवक्रत्वप्रकाराः सम्भवन्ति षट् इत्यनेन कस्याः भेदं कथितम् ?
(क) अर्थवक्रतायाः (ग) वाक्यवक्रतायाः
(ख) शब्दवक्रतायाः (घ) काव्यवक्रतायाः

(७८) प्रश्न– 'रामोऽस्मि सर्वं सहे' कस्य वक्रतायाः उदाहरणमस्ति ?
(क) शब्दवक्रतायाः (ग) अर्थवक्रतायाः
(ख) पदपूर्वार्धवक्रतायाः (घ) वाक्यपूर्वार्धवक्रतायाः

(७९) प्रश्न– पदपूर्वार्धवक्रतायाः द्वितीयः भेदः कः ?
(क) अर्थवक्रता (ग) उपचारवक्रता
(ख) वाक्यवक्रता (घ) शब्दवक्रता

(८०) प्रश्न– विशेषणवक्रता कस्य भेदः ?
(क) वाक्यवक्रतायाः (ग) शब्दवक्रतायाः
(ख) पदपूर्वार्धवक्रतायाः (घ) अर्थवक्रतायाः

(८१) प्रश्न– मैथिली तस्य दाराः' कस्य वक्रतायाः उदाहरणम् ?
(क) जातिवैचित्र्यवक्रतायाः (ग) लिङ्गवैचित्र्यवक्रतायाः
(ख) गुणवैचित्र्यवक्रतायाः (घ) क्रियावैचित्र्यवक्रतायाः

(८२) प्रश्न– 'यत्राचेतनस्यापि पदार्थस्य चेतनत्वाध्यारोपेण' कस्य वक्रतायाः लक्षणम् ?
(क) कारकवैचित्र्योत्सन्नवक्रता (ग) क्रियावैचित्र्योत्पन्नवक्रता
(ख) गुणवक्रता (घ) लिङ्गवैचित्र्यवक्रताः

(८३) प्रश्न– 'चन्द्रहासो लज्जत' इत्यत्र कस्य वक्रतायाः उदाहरणम् ?
(क) वर्णविन्यासवक्रतायाः (ग) पदपूर्वार्धवक्रतायाः
(ख) कारकवैचित्र्यवक्रतायाः (घ) क्रियावैचित्र्यवक्रतायाः

(८४) प्रश्न– 'वक्रभावः प्रकरणे प्रबन्धे वास्ति यादृशः' कस्मिन् ग्रन्थे उद्धृतोऽस्ति ?
(क) साहित्यदर्पणे (ग) काव्यालङ्कारे
(ख) काव्यप्रकाशे (घ) वक्रोक्तिजीविते

(८५) प्रश्न– 'वाच्यवाचकसौभाग्यलावण्य परिपोषकः' इत्यत्र कस्य वर्णनमस्ति ?
(क) बन्धस्य (ग) प्रकरस्य
(ख) प्रत्ययस्य (घ) शब्दस्य

(८६) प्रश्न– 'भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः' इत्यत्र कस्य लक्षणम् ?
(क) विचित्रमार्गस्य (ग) सुकुमारमार्गस्य
(ख) उभयात्मकमार्गस्य (घ) अन्यमार्गस्य

(८७) प्रश्न– कति कारिकासु सुकुमारमार्गस्य वर्णनमस्ति ?
(क) द्वे (ग) तिस्रः
(ख) पञ्च (घ) चतस्रः



Scanned with CamScanner

(८८) प्रश्न– 'असमस्तमनोहारि पदविन्यासजीवितम्' कस्य गुणस्य लक्षणम् ?
(क) प्रसादस्य
(ख) ओजस्य
(ग) माधुर्यस्य
(घ) कान्तेः

(८९) प्रश्न– 'अक्लेशव्यञ्जिताकूतं झगित्यर्थं समर्पणम्' कस्य गुणस्य लक्षणम् ?
(क) प्रसादस्य
(ख) ओजसः
(ग) माधुर्यस्य
(घ) कान्तेः

(९०) प्रश्न– 'वर्णविन्यासविच्छित्तिपदसन्धानसम्पदा' कस्य लक्षणम् ?
(क) माधुर्यस्य
(ख) प्रसादस्य
(ग) लावण्यस्य
(घ) कान्तेः

(९१) प्रश्न– 'श्रुतिपेशलताशालि सुस्पर्शमिव चेतसा ?
स्वभावमसृणच्छायमाभिजात्यं प्रचक्षते ।।'
इत्यत्र कस्य लक्षणम् ।
(क) लावण्यस्य
(ख) अभिजात्यस्य
(ग) माधुर्यस्य
(घ) प्रसादस्य

(९२) प्रश्न– अभिजात्यम् कस्य भेदः ?
(क) सुकुमारमार्गस्य
(ख) मध्यममार्गस्य
(ग) विचित्रमार्गस्य
(घ) अन्यमार्गस्य

(९३) प्रश्न– 'प्रतिमाप्रथमोद्भेदसमये यत्र वक्रता ।
शब्दामिधेययोरन्तःस्फुरतीव विभाव्यते ।।'
अस्यां कारिकायां कस्य लक्षणं वर्णितम् ?
(क) सुकुमारमार्गस्य
(ख) अन्यमार्गस्य
(ग) मध्यममार्गस्य
(घ) विचित्रमार्गस्य

(९४) प्रश्न– कतिषु कारिकासु विचित्रमार्गस्य वर्णनं वर्णितम् ?
(क) षट्
(ख) दश
(ग) सप्त
(घ) अष्टौ

(९५) प्रश्न– 'विचित्रो यत्र वक्रोक्तिवैचित्र्यं जीवितायते ।
परिस्फुरति यस्यान्तः सा काव्यतिशयाभिधा ।।
इत्यत्र कस्य वर्णनमस्ति ?
(क) सुकुमारमार्गस्य
(ख) मध्यममार्गस्य
(ग) विचित्रमार्गस्य
(घ) अन्यमार्गस्य

(९६) प्रश्न– 'अन्यद् लटभत्वमन्यैव च कापि वर्तनच्छाया ।
श्यामा सामान्यप्रजापते रेखैव च न भवति ।।'
अयं कस्य मार्गस्योदाहरणमस्ति ?

Scanned with CamScanner

(क) विचित्रमार्गस्य (ग) मध्यममार्गस्य
(ख) सुकुमारमार्गस्य (घ) अन्यमार्गस्य

(९७) प्रश्न– वैचित्र्यं व्याख्याय कस्य गुणान् व्याचष्टे: ?
(क) प्रसादस्य (ग) माधुर्यस्य
(ख) ओजस: (घ) कान्तेः

(९८) प्रश्न– वैदग्ध्यस्यन्दि माधुर्यं पदानामत्र बध्यते ।
याति यद्वक्त्रशैथिल्यं बन्धबन्धुरताङ्गताम् ।।
इत्यत्र कस्य गुणस्य वर्णनमस्ति ?
(क) सुकुमार-माधुर्ययोः (ग) सुकुमार-प्रसादयोः
(ख) विचित्र-प्रसादयोः (घ) विचित्र-माधुर्ययोः

(९९) प्रश्न– असमस्तपदन्यासः प्रसिद्धः कविवर्त्मनि ।
किञ्चिदोजः स्पृशन् प्रायः प्रसादोऽप्यत्र दृश्यते ।।
इत्यत्र कस्य गुणस्य वर्णनमस्ति ?
(क) विचित्र-प्रसादयोः (ग) सुकुमार-प्रसादयोः
(ख) विचित्र-माधुर्ययोः (घ) विचित्र-ओजसोः

(१००) प्रश्न– यत्र ओजः स्पृशन् तत्र कः गुणः ?
(क) ओजः (ग) कान्तिः
(ख) माधुर्यम् (घ) प्रसादः

(१०१) प्रश्न– अत्रालुप्तविसर्गान्तैः पदैः प्रोतेः परस्परम् ।
ह्रस्वैः संयोगपूर्वैश्च लावण्यमतिरिच्यते ।।
इत्यत्र कस्य गुणस्य वर्णनमस्ति ?
(क) प्रसादस्य (ग) ओजसः
(ख) लावण्यस्य (घ) माधुर्यस्य

(१०२) प्रश्न– 'हंसानां निनदेषु' कस्य गुणस्योदाहरणम् अस्ति ?
(क) प्रसादस्य (ग) ओजसः
(ख) लावण्यस्य (घ) माधुर्यस्य

(१०३) प्रश्न– यन्नाति कोमलच्छायं नाति काठिन्यमुद्वहत् ।
आभिजात्यं मनोहारि तदत्र प्रौढिनिर्मितम् ।।
अत्र को गुणः वर्णितः ?
(क) लावण्यम् (ग) माधुर्यम्
(ख) प्रसादः (घ) आभिजात्यम्

(१०४) प्रश्न– वैचित्र्यं सौकुमार्यं च यत्र सङ्कीर्णतां गते ।
भ्राजेते सहजाहार्यशोभातिशयशालिनी ।।
इत्यत्र कस्य वर्णनमस्ति ?

Scanned with CamScanner

(क) सुकुमारमार्गस्य (ग) अन्यमार्गस्य
(ख) मध्यममार्गस्य (घ) विचित्रमार्गस्य

**(१०५) प्रश्न– कौ मार्गौ सङ्कीर्णतां लब्ध्वा सुशोभेते ?**
(क) मध्यम-विचित्रौ (ग) सुकुमार-विचित्रौ
(ख) सुकुमार-मध्यमौ (घ) न कोऽपि

**(१०६) प्रश्न– माधुर्यादि गुणग्रामो वृत्तिमाश्रित्य मध्यमाम् ।**
**यत्र कामणि पुष्णाति बन्यच्छायाति रिक्तताम् ।।**
**इत्यत्र कस्य लक्षणं लक्षितम् ?**
(क) मध्यम: (ग) सुकुमार:
(ख) विचित्र: (घ) अन्य:

**(१०७) प्रश्न– कति कारिकायां मध्यममार्गस्य वर्णनं कृतम् ?**
(क) पञ्च (ग) द्वे
(ख) तिस्र: (घ) चतस्र:

**(१०८) प्रश्न– 'तद्वक्त्रेन्दुविलोकनेन' अयं कस्य गुणस्योदाहरणम् ?**
(क) लावणस्य (ग) प्रसादस्य
(ख) माधुर्यस्य (घ) ओजस:

**(१०९) प्रश्न– आलम्ब लम्बा: सरसाग्रवल्ली: पिबन्ति यस्य स्तनभारनम्रा: ।**
**स्रोतश्च्युतं शीकरकूणिताक्ष्यो मन्दाकिनी निर्झरमश्वमुख्य: ।।**
**इत्यत्र कस्य गुणस्य उदाहरणमस्ति ?**
(क) आभिजात्यगुणस्य (ग) लावण्यगुणस्य
(ख) प्रसादगुणस्य (घ) माधुर्यगुणस्य

**(११०) प्रश्न– आञ्जसेन स्वभावस्य महत्त्वं येन पोष्यते ।**
**प्रकारेण तदौचित्यमुचिताख्यानाजीवितम् ।।**
**इत्यत्र कस्य गुणस्य लक्षणमस्ति ?**
(क) आभिजात्यगुणस्य (ग) औचित्यगुणस्य
(ख) लावण्यगुणस्य (घ) माधुर्यगुणस्य

**(१११) प्रश्न– करतलकलिताक्षमालयो: समुदितसाध्वससन्नहस्तयो: ।**
**कृतरुचिरजटानिवेशयोरपर इवेश्वरयो: समागम: ।।**
**इत्यत्र कस्य गुणस्योदाहरणम् ?**
(क) लावण्यस्य (ग) माधुर्यस्य
(ख) औचित्यस्य (घ) अभिजात्यस्य

**(११२) प्रश्न– यत्र वक्तु: प्रमातुर्वा वाच्यं शोभातिशायिना ।**
**आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते ।।**
**इत्यत्र कस्य गुणस्य वर्णनमस्ति ?**

Scanned with CamScanner

(क) लावण्यस्य (ग) औचित्यस्य
(ख) आभिजात्यस्य (घ) माधुर्यस्य

(११३) **प्रश्न– इत्युपादेयवर्गेऽस्मिन् यदर्थं प्रतिभा कवेः ।**
**सम्यक् संरमते तस्य गुणः सौभाग्यमुच्यते ।।**
**इत्यत्र कस्य गुणस्य वर्णनमस्ति ?**

(क) सौभाग्यस्य (ग) लावण्यस्य
(ख) औचित्यस्य (घ) माधुर्यस्य

(११४) **प्रश्न– काव्यस्यैकमात्रप्राणभूतं कं गुणं मन्यते ?**

(क) लावण्यम् (ग) औचित्यम्
(ख) माधुर्यम् (घ) सौभाग्यम्

(११५) **प्रश्न– कौ गुणौ शोभितौ भूत्वा तिष्ठतः ?**

(क) लावण्य-माधुर्यौ (ग) औचित्य-माधुर्यौ
(ख) सौभाग्यमौचित्यौ (घ) लावण्य-सौभाग्यौ

Scanned with CamScanner

नितरां सुशोभना सुपदन्यासा सुवर्णमयमूर्तिः सरसापि कविता अलङ्कारवर्जिता सती सहृदयान् सुनिभृतं प्रीणयति। यथाह भामहो नामालङ्कारिकः-

**न कान्तमपि निर्भूषं विभाति वनितामुखम्।** इति।[1]

अतएव तत्रभवान् आचार्यकुन्तकः लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये वक्रोक्तिजीवितापरपर्यायम् अलङ्कारनामानं काव्यशास्त्रं जग्रन्थ। यथोक्तम् —

**लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये।**

**काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते॥** इति[2]

शरीरभूषणेषु कटककुण्डलादिषु अलङ्कारशब्दो मुख्यतया प्रयुज्यते। शोभातिशयकारित्वसाम्यादुपमाद्यर्थेषु गौणतयाऽस्य प्रयोगः। सादृश्यादस्य गुणादावर्थे प्रयोगश्चेत् शब्दार्थयोस्तादात्म्याद् ग्रन्थस्य कृतेऽपि अस्य प्रयोगो दुर्निवारः।

उपमादिभिरलङ्कारैरलङ्कार्यस्य शब्दार्थोभयवपुषःकाव्यस्य सहृदयहृदयहारितया चतुर्वर्गफलप्राप्तिः मुख्यं प्रयोजनं भवति। औचितीजुष्टव्यवहारबोधादिकन्तु काव्यसेवनस्य अवान्तरप्रयोजनमिष्यते। यथोक्तम् —

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥** इति[3]

काव्यामृतरसेन काव्यसेविनां यदन्तश्चमत्कृतिरसास्वादः समुल्लसति स तु चतुर्वर्गफलास्वादादपि विशिष्यते।

आचार्यकुन्तकः सुस्पष्टं प्रतिपादयति यत् केवलं शब्दो न काव्यम्, शब्दार्थौ चालङ्कारं विना न काव्यम् इष्यते। प्रत्युत विलक्षणकविव्यापारशालि-बन्धे शब्दार्थौ सहितौ काव्यमित्युच्यते। युज्यते चैतत् । यथा प्रतितिलं तैलमनुस्यूतं तिष्ठति तथैव शब्दार्थयोर्द्वयोरपि तद्विदाह्लादकारित्वं वर्तते न त्वेकतरस्मिन् । यथोक्तम् —

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥** इति[4]

शब्दार्थयोः विशिष्टं साहित्यमत्राभिप्रेयते। शब्दार्थौ इत्यत्र द्विवचनेन जातिद्वित्वमभिप्रेयते न तु व्यक्तिद्वित्वम् । बन्धे व्यवस्थितौ इत्यनेन शब्दार्थयोः वाक्यविन्यासे लावण्यादिगुणालंकार-विशिष्टसन्निवेशेन कृतावस्थानता विवक्षिता। सहितावित्यनेन च वक्रतादिविचित्रगुणालङ्कार-

---

1. काव्यालङ्कारः 1/13
2. वक्रोक्तिजीवितम् का० 2
3. काव्यप्रकाशः प्रथमोल्लासः
4. वक्रोक्ति काव्य 7

Scanned with CamScanner

सम्पदां परस्परस्पर्धाधिरोहात्मकं वैशिष्ट्यं विवक्षितमिति श्रद्धाराद्गुरूणामेवाधीतिनामेतत् सुगमम्। यदुक्तम् —

**वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।**
**तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः॥**
**शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।**
**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥** इति[1]

एतादृशं कुन्तकाभिमतं काव्यशरीरमनुशीलयितुं महाकवेःकालिदासस्य पद्यमिदं नितरामुत्कृष्टं विद्यते—

**द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।**
**कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी॥** इति[2]

काव्यशरीरतया अभिमतौ यौ शब्दार्थौ तयोर्द्वित्वसंख्याविशिष्टयोरलंक्रिया प्रसिद्धाभिधानव्यतिरेकिण्या विचित्रयाऽभिधया वक्रोक्तिनाम्न्या नितरामपेक्ष्यते इति आचार्यकुन्तकस्य अलङ्कारशास्त्रीयमवदानं स्वीक्रियते तद्विद्भिः।

प्रसङ्गेऽस्मिन् स्वभावोक्तेरलङ्कारतामभ्युपगच्छतां पूर्वेषामालङ्कारिकाणां दण्डिप्रभृतीनामालोचनं कुर्वता आचार्यकुन्तकेन प्रकृष्टेयमापत्तिरुपस्थापिता यदि नाम स्वभावोक्तिरलङ्कारस्तर्हि अलङ्कार्यरूपतया तस्याः, कुत्र तावदलङ्कार्यान्वेषणा तथा विधीयतामिति। यतो हि स्वभावरहितं चेद् वस्तु तस्य निरुपाख्यता समायाति। नहि निरुपाख्ये वस्तुनि शब्दापरपर्यायापाख्यागोचरता सम्भवति। यदुक्तम् —

**भवतोऽस्मादभिधानप्रत्ययाविति भावः। स्वस्यात्मनो भावः स्वभावः। तेन वर्जितमसत्कल्पं वस्तु शरविषाणप्रायं शब्दज्ञानागोचरतां प्रतिपद्यते।** इति[3]

**शरीरं चेदलंकारः किमलङ्कुरुतेऽपरम्।**
**आत्मैव नात्मनःस्कन्धं क्वचिदप्यधिरोहति॥** इति च[4]

नाट्यशास्त्रे महामुनिना भरतेन नाट्यात्मनः काव्यस्य प्रयोजनं यत् प्रतिपादितं तत् प्राचीनतमं विद्यते। तत्र कानिचित् प्रयोजनानि ऐहलौकिकानि कानिचित् पुनः पारलौकिकानि सन्ति। तद्यथा इह जीवने यानि श्रमशोकदुःखानां निवृत्तिपुरःसरं विश्रमोपजननानि लभ्यन्ते तानि ऐहलौकिकानि उच्यन्ते। यानि तु देहान्तरप्राप्तौ कल्याणानि लभ्यन्ते तानि पारलौकिकानि भवन्ति। धर्ममोक्षादिकस्यावाप्तिः द्वितीयकोटिका भवति। यदुक्तम्—

1. वक्रोक्ति का० 1/8-9
2. कुमारसम्भवम् 5/7
3. वक्रोक्ति 1/12 वृत्तिः
4. वक्रोक्ति 1/13